# READING -2

दशरथस्तस्य कुपितस्य ब्राह्मणस्य वचनं शृणोति । किंतु कालेन तं शापं विस्मरति । अयोध्यायां भार्याभिः सह सुखं वसति राज्यं करोति च । सुखितस्य नृपस्यैकं दुःखम् । तस्य पुत्रो नास्तीति । ततो ब्राह्मणैः सह स प्रजायै यज्ञं करोति । अथ कालेन पुत्राणां चतुष्टयमुद्भवति । रामश्च लक्ष्मणश्च भरतश्च शत्रुघ्नश्चेति पुत्राणां नामधेयानि । पार्थिवस्य पुत्राः सुन्दराः शान्ता वीराश्च । तेषु ज्येष्ठो रामो गुणैः श्रेष्ठो भवति । तस्मान्नृपो रामे स्निह्यति विशेषतः ॥